लोकप्रियसाहित्यग्रन्थमाला - 34

# पण्डितपरिषद्व्याख्यानमाला

( अखिलभारतीयप्राच्यविद्यासम्मेलने ४५ तमे अधिवेशने
जून् ०३-०४, २०१० इति दिनाङ्कयोः प्रवर्तितायाः
पण्डितपरिषदः व्याख्यानानां सङ्कलनम् )

सम्पादकः
**आचार्यः का.इ. देवनाथः**

राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

# पुरोवाक्

विदन्त्येव विज्ञा यद् विश्वस्य ज्ञान-विज्ञान-विमर्शपरम्परासु अतिमहद-वदानं वरीवर्त्यते भारतीयप्रज्ञायाः। अस्या प्रज्ञायाः परमप्रकर्षं विभावयामः अस्माकं शास्त्रपरम्परासु। एताश्च शास्त्रपरम्परा आवेदेभ्यः प्रसृता अद्यावधि विकासं यान्तीति न संशीतिः। विद्-ज्ञाने, विद्-सत्तायाम्, विद्लृ लाभे तथा विद्-विचारणे इति धातुचतुष्टयविनिष्पन्नो वेदशब्दः चतुरस्रतां ज्ञानप्रवाहस्य द्योतयति। विदन्ति जानन्ति, विद्यन्ते भवन्ति, अथवा विन्दन्ते लभन्ते, विन्दन्ति विचारयन्ति सर्वे मनुजा सत्यविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः- इति ऋषिदयानन्दोक्तेः। वेद्यते ज्ञायते अनेनेति वेदः इत्युक्त्यापि वेदस्य ज्ञानस्रोतस्त्वं सिध्यति।

अथैतेषां वेदानां शाखा-चरण-परिषद्भिः संरक्षणं प्रसारश्च समजायत। तथैव शाखा-चरण-परिषत्सु शास्त्रपरम्पराऽपि प्रसारं विकासं चापेदे। संहितानां शाखास्तासु तासु गुरुशिष्यपरम्परासु अभ्यस्ताः। चरणशब्दः शाखा-विशेषाध्ययनपरैकतापन्नजनसङ्घवाची' इति जगद्धरोक्तेः शाखाविशेषमधीयानां जनानां समाजश्चरण इति न्यगद्यत। तथा च चरणानां सङ्घा एव परिषदिति प्रोक्ताः। परिषत्सु विज्ञाः पण्डिता अवश्यं भवेयुरिति व्यवस्था आसीत्। दर्शन-तर्क-धर्मशास्त्रादिष्वबाह्या एकविंशतिर्विप्राः प्रत्येकं परिषदि स्युरिति मनोः याज्ञवल्क्यस्य च लक्षणात्। परिषदि अभ्यस्ताः ग्रन्था पार्षदा इत्यहिताः।

यद्यपि वेदेषु संहितासु वा सर्वत्र ज्ञानराशिः सञ्चितस्तथापि तद्गतानां दार्शनिकसूक्तानां सविशेषं महत्त्वं परिलक्ष्यते भारतीयशास्त्रपरम्पराया उद्भवे विकासे च। एतेषु सूक्तेषु जीवनस्य रहस्यं सृष्टिप्रक्रियां परमतत्त्वं वा विषयीकृत्य ऋषिभिः स्वानुभूतयो विवृताः। ऋग्वेदे अस्यवामीयसूक्ते (1/164) नासदीयसूक्ते (10/129), हिरण्यगर्भसूक्ते (10/121) तथा पुरुषसूक्ते (10/90) च प्रमाणमीमांसां ज्ञानमीमांसां वाऽऽश्रित्य विशिष्टो विमर्शः वरीवर्त्यते।

# विषयसूची


कुलपतिसन्देशः

सम्पादकीयम्

**Report on the Pandita Parishad** - i-xii

1. व्यवस्थितविभाषयाऽपि कार्याणि क्रियन्ते - के. अनन्तः - 1-2
2. षष्ठीसमासनियमसमीक्षा - अर्कनाथचौधरी - 3-6
3. वर्णसमाम्नाये संहिताविरहविमर्शः - आजादमिश्रः - 7-13
4. निर्वर्त्य-विकार्यकर्मविषये काचन व्याख्या - एस्.एल्.पि. आञ्जनेयशर्मा - 14-25
5. सत्प्रतिपक्षशतकोटिविचारः - ओ.जि.पि. कल्याणशास्त्री - 26-28
6. तृतीयमिथ्यात्वविचारः - के.गणपतिभट्टः - 29-31
7. पाणिनीयप्रक्रियाविज्ञानम् - दीक्षितपुष्पा - 32-39
8. हेत्वाभाससामान्यनिरुक्तिविवेचन्यनुसारेण द्वितीयहेत्वाभासलक्षणे विशिष्टद्वयघटितत्वपरिष्कारविमर्शः - ई.एम्.देवन् - 40-43
9. धर्मभूतज्ञानम् – एको विचारः – का.इ.देवनाथः - 44-51
10. गायत्रं छन्दः, छन्दसो वेदाङ्गत्वम् - रामानुजदेवनाथः - 52-57
11. विशेषदर्शनोत्तरप्रत्यक्षम् - नवीनहोल्लः - 58-61
12. पूर्वविकल्पाधिकरणम् - टि.एस्.आर्. नारायणन् - 62-66
13. उभयवृत्तित्वघटितकल्पविचारः - रामचन्द्रुल. बालाजी - 67-70
14. काव्ये काव्यशास्त्रीयसिद्धान्तोपस्थितिविमर्शः – भागीरथीनन्दः - 71-73
15. साक्षिज्ञानस्य अतिरिक्तत्वाङ्गीकारे कारणानि - के.एस्. महेश्वरन् - 74-76
16. उभयलिङ्गाधिकरणसूत्रभाष्ये न्यायविरोधपरिहारः - के.विश्वनाथः - 77-80

17. सङ्ख्यायाः प्रकृत्यर्थत्वखण्डनम् - एन्.आर्.श्रीधरन् - 81-82
18. विशिष्टद्वयाघटितत्वे स्वरूपसम्बन्धरूपावच्छेदकत्वविचारः
- ओ.श्रीरामलालशर्मा - 83-86
19. अद्वैतवेदान्तदृष्ट्या तत्त्वमसिवाक्यविमर्शः – सुकान्तकुमारसेनापतिः - 87-92
20. आत्मवादः – हित्लळ्ळि.सूर्यनारायणनागेन्द्रभट्टः - 93-100
21. शब्दशक्तिमूलध्वनिः - सूर्यमणिरथः - 101-108
22. भट्टोजिदीक्षितसम्मतप्रातिपदिकार्थखण्डनम् - 109-113
- हरिनारायणतिवारी

।। श्रीः ।।

# 3. वर्णसमाम्नाये संहिताविरहविमर्शः



आजादमिश्रः

भगवान् पाणिनिरष्टाध्याय्यामादौ वर्णसमाम्नायमुपदिदेश । सोऽयमक्षर-समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः इति व्याचख्यौ महर्षिः पतञ्जलिः । यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्य अक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ताऽस्ति, एवमेव वेदपारम्पर्येण स्मर्यमाणम् इत्युपपादितवान् आचार्यो भर्तृहरिः । तत्र जिज्ञासितं वैयाकरणैः यद् 'अइउण्' इत्यादिवर्णोपदेशसूत्रेषु सन्धिशास्त्रीयोद्देश्यतावच्छेदकसद्भावात् कथन्न विहितं संहिताकार्यमिति ।

अस्या जिज्ञासायाः समाधानमादौ 'अइउण्' सूत्रभाष्यप्रदीपे कैयटेनोद्-भावितम् – **'स्वरसन्धिस्तु न प्रवर्तते, वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादादि'**ति । वर्णसमाम्नाये संस्कृतव्याकरणवर्णमालायाः स्वरूपबोधनं मुख्यं प्रयोजनम्, पाणिनीयव्याकरणे उपयुक्तानां वर्णानां वर्णक्रमस्य च स्वरूपबोधनं सर्वप्रथममपेक्षितम्, अतः तस्मिन् कालेऽजादिसंज्ञानाम् अनिष्पादात् अजादिसंज्ञोपदेशप्रसङ्गाभावात् तदुद्देश्यकः सन्धिविधिर्न प्रवर्तते इति कैयटाशयः ।

ततो भट्टोजिदीक्षितः शब्दकौस्तुभे कैयटोक्तसमाधानस्य दोषान् पर्यजीगणत्। तथाहि –

1. वर्णोपदेशे सति इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्तमानानां यणादीनां **'सुद्ध्युपास्य'** इत्यादौ तटस्थ इव उद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि तत्प्रवृत्तिर्दुर्वारा स्यात् ।

2. अन्यथा **'तुल्यास्यप्रयत्नम् ...'** इत्यादौ सवर्णदीर्घो न स्यात्, अस्य सूत्रस्योपदेशकाले सवर्णदीर्घविधेरनिष्पादात् । तथा अर्थवत्सूत्रान्तर्गतानां प्रातिपदिकत्वम्, **'प्रत्ययःपरश्च'** इत्यादौ सुप्रत्ययः **'ङ्याप्प्रातिपदिकात्'** **'द्व्येकयो-**

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः )
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नवदेहली-110058